# महाराजासयाजिरावविश्वविद्यालयस्य वाचस्पतिः (Ph.D)

## इत्युपाधये स्वीकृतस्य विषयस्य शोधप्रबन्धस्य

## (सारांशिका) Synopsis

**&&&&&&&&&&&&&&&&&&&**
**&&&&&&&&&&&&&&&&&&&**
**&&&&&&&&&&&&&&&**

# "ज्योतिषशास्त्रोक्तराजयोगानां विश्लेषणात्मकमध्ययनम्"

**&&&&&&&&&&&&&&&&&&**
**&&&&&&&&&&&&&&&&&&**
**&&&&&&&&&&&&&&&&&**


**निर्देशकः** | **शोधकर्त्री**

**डॉ. रामपाल शुक्लः**
**अध्यक्षः**
बरोडासंस्कृतमहाविद्यालयः
महाराजासयाजिरावविश्वविद्यालयः,
वटपत्तनम्, गुजरात

**श्रीमती प्रज्ञा मनुभाई तन्ना**
बरोडासंस्कृतमहाविद्यालयः
महाराजासयाजिरावविश्वविद्यालयः,
वटपत्तनम्, गुजरात


## शोधकेन्द्रम्

बरोडासंस्कृतमहाविद्यालयः

महाराजासयाजिरावविश्वविद्यालयः,
वटपत्तनम्, गुजरात

**पञ्जीकरण संख्या FOA/ 1340** **वर्षम् :** 2019

# ज्योतिषशास्त्रोक्तराजयोगानां विश्लेषणात्मकमध्ययनम् इत्यस्य सारांशः

---

## भूमिका : ----

भारतीयसंस्कृतिः जगति प्राचीनतमा संस्कृतिः वर्तते। भारतीयसंस्कृत -वाङ्गमयं अतीवसमृद्धं विस्तृतं चाऽस्ति। तत्र विभागद्वयं वर्तते। वैदिकसाहित्यं लौकिकसाहित्यञ्च। समस्तसंस्कृतवाङ्गमयस्य उपजीव्याः चत्वारो वेदाः एव। कथितं यत् --

**''इतिहास पुराणाभ्यां वेदं समुपबृह्येत।[1]''**

मानवजीवने चतुर्विधपुरुषार्थसिद्धयर्थं चतुर्दशविद्यास्थानानि कथितानि। यथा ऋक-यजु-साम-अथर्व-वेदाः, शिक्षा-कल्प-व्याकरण- निरुक्त-छन्दो -ज्योतिषादीनि इति षड्वेदाङ्गानि तत्र ज्योतिषशास्त्रं कालप्रदर्शकं इति कारणेन नेत्ररूपेण स्वीक्रियते। अस्य शास्त्रस्य उत्पत्तिः ब्रह्मणः एव अभूत्। ब्रह्मणा प्रवर्तितं ज्योतिषमिदं उत्तरोत्तरं नारदतः पराशर-मैत्रेयपर्यन्तम् स्वशिष्येभ्यः प्रोक्तम् । यथा गर्गाचार्येण कथितम् -

**स्वयं स्वयम्भुवा सृष्टं चक्षुर्भूतं द्विजन्मनाम्।**
**वेदाङ्ग ज्योतिषं ब्रह्मपरं यज्ञहितावहम्।**
**मया स्वम्भुवः प्राप्तं क्रियाकालप्रसाधनम् ।।[2]**

----------------------------------------------------------------

1. महाभारत - 1/268
2. ज्यो.शा. इतिहास, पृ. 10

अस्य ज्योतिषशास्त्रस्य प्रवर्तकाः अष्टादश आचार्याः सन्ति। यथा--

**सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः ।**
**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।**
**रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**
**शौनकोऽष्टादशश्चैते ज्योतिशास्त्रप्रवर्तकाः ।।**[1]

ज्योतिषशास्त्रे लगधनाम्ना मुनिप्रणीतवेदाङ्गज्योतिषग्रन्थः प्राचीनतमे -ग्रन्थः वर्तते। अनन्तााकाशे सूर्यचन्द्रताराग्रहानक्षत्राणां-ज्योतिपिण्डानां कालावस्था -भूतलेगतियुतिस्थित्यानुसारेण मनुष्यजीवने च प्रभावो कथं भवति इत्यस्यशास्त्रस्य विषयः। ग्रहनक्षत्राणां गतिविधिकारणेन योगानां मनुष्यजीवनोपरि प्रभावः भवति।

1.ज्योतिषशास्त्रे अनेके विषयाः सन्ति तत्रापि योगानां विषयेऽपि विवेचनं प्राप्यते। योगाः अनैकविधाः सन्ति। तत्र प्रमुखरूपेण नाभसयोगाः पञ्चमहापुरुषयोगाः अरिष्टयोगाः राजयोगाः प्रवज्यायोगाः, रोगकारकयोगाः वर्णिताः सन्ति।

वर्तमानकाले मनुष्यजीवने अर्थप्राप्तिरेव प्रमुखहेतुः। सर्वे गुणाः काञ्चनमाश्रयन्ते ।

ज्योतिषशास्त्रे राजयोगतः ज्ञायते यत् मनुष्यः केन प्रकारेण राजसुखं, धनसुखं, सत्तासम्पत्तिञ्च प्राप्नोति। अतएव मया सर्वजनहिताय औत्सुक्येन राजयोगविषये शोधकार्यं कृतमिति । राजयोगेषु अपि मुख्यत्वेन त्रयभेदाः सन्ति। यथा --

1.महायोगः 2.विपरीतराजयोगः 3.नीचभङ्गराजयोगः ।

तत्र ज्योतिषशास्त्रस्य विविधग्रन्थेषु राजयोगनां वर्णनं प्राप्यते तथा च राजयोगः कदा भवति ? केन कारणेन तस्य भङ्गः भवति ? केषां

---

1. कभयप संहिता - 1⁄ 2-3

ग्रहाणां संयोगे कस्मिन् लग्ने प्राप्यते। ग्रहाणां शुभाशुभस्थानस्वामित्व -कारणेन कीदृशो प्रभावोपजायते इत्येषां सर्वेषां विषयाणां विश्लेषणं पाराशर-कालिदास-गर्गाचार्य-वराहमिहिर-नारदादि प्रमुखाचार्यैः प्रतिपादितम्।

राजयोगविषये इतः पूर्वं यत् संशोधनं जातं किन्तु राजयोगानां विश्लेणात्मकमध्ययनं ज्योतिर्विदां ज्योतिषरसिकाणां च कृते स्वतंत्ररूपेण अद्यावधिनैवभूतम् । अतः अनेन शोधकार्येण परवर्तीनां जनानां शोधच्छात्राणां च कृते बहु उपयोगि भवेदित्याशय कार्यं कृतमस्ति ।

2.मया शोधप्रबन्धः पञ्चसु अध्यायेषु विभक्तः कृतः अस्ति। तत्र ज्योतिषशास्त्रस्य परिचयः तस्य मूलभूततत्वानि, योगशब्दस्य परिचय-प्रकराणि, राजयोगानां परिचयः, तेषां भेदाः एवं प्रमुखाचार्याणां मते प्रमुखराजयोगाः तथा च विविधोदहरणपूर्वकं तेषां विश्लेणात्मकम् अध्ययनं सम्पादितम् ।

**1. प्रथमे हि <u>ज्योतिषशास्त्रस्य साङ्गोपाङ्गवर्णनमस्ति</u> ।**

1. षड्वेदाङ्गेषु ज्योतिशास्त्रस्य महत्त्वम् ।
2. ज्योतिशास्त्रस्य परिचयः मूलभूततत्त्वानि ।
3. ज्योतिशास्त्रस्य वैशिष्ट्यमुपयोगिता च ।

**(1)षड्वेदाङ्गेषु ज्योतिशास्त्रस्य महत्त्वम् :---**

समस्त-संस्कृतवाङ्मयस्य मुख्याधारः चत्वारो वेदाः सन्ति। वेदानां सम्यग्ज्ञानार्थं वैदिकसाहित्यस्य सहायकानि षडाङ्गानि शिक्षा-कल्प-व्याकरणं-निरुक्तं-छन्दो-ज्योतिषादीनि इति सन्ति । तद्यथा ---

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते**

**ज्योतिषामयनं चक्षुर्निऋक्तं श्रोतमुच्यते।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**

**तस्मात्साऽगमधीत्यैव ब्रह्मलोके महीयते ।।** (पा.शि. 41-42)

ज्योतिषशास्त्रं षडङ्गेषु चक्षुरूपेण वर्तते। जीवने नेत्रस्योपयोगिता अतीव अस्ति । नेत्रविहीनं संसार: अन्धाकारयुक्त: प्रतीयते तेन कारणेन नेत्रस्यावश्यकता अनिवार्या अस्ति । अनेनरूपेण षडङ्गानां मध्ये अपि ज्योतिषस्य महत्त्वं निरतिशयं वर्तते। लगधाचार्येण अपि ऋग्वेदज्योतिषे वर्णितं यद् वेदाङ्गेषु ज्योतिषं मूर्ध्नि संस्थितम् । यथा ---

**यथाशिखा मयूराणां नागानां मणयो यथा ।**

**तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम् ।।**[1]

वेदा: यज्ञप्रधाना सन्ति। तस्य सम्यग्रूपेण संपादनार्थं मुर्हूतानां आवश्यकता भवति। मुहूर्तानां गणनार्थं कालगणना आवश्यकी भवति। कालगणनाया: क्रम: ज्योतिषस्योऽस्ति। तथैव मुर्हूतज्ञानं, दिग्ज्ञानं, तिथिवारादिज्ञानं, ज्योतिशास्त्रादेव सिद्धयति। अत: शास्त्रदृष्ट्या, व्यवहारदृष्ट्या शुभाशुभफलकथने च ज्योतिषशास्त्रं मूर्ध्निं संस्थितम् ।

(2) **ज्योतिशास्त्रस्य मूलभूततत्त्वानि** :---

ज्योतिषशब्दस्य कोऽर्थ: ?

गगनमण्डले दृश्यमानज्योतिषपिण्डानां सम्यग्रूपेण ज्ञापकशास्त्ररूपेण प्रसिद्धमस्ति ज्योतिषशास्त्रम् । ज्योतिशास्त्रस्य त्रयो: विभागा: सन्ति । यथा -- 1.सिद्धान्त: 2.संहिता 3.होरा च

परञ्च वर्तमानसमये ज्योतिषशास्त्रस्य पञ्चविभागा: स्वीकुर्वन्ति आचार्या: । पूर्वोक्तानुसारेण सिद्धान्त-संहिता-होरा विहाय प्रश्नशास्त्रमपि शकुनशास्त्रमपि ज्योतिशास्त्रस्य अङ्गरूपेण स्वीकृतम् अर्वाचीनज्योतिष -विद्वद्भि:। एतेषां पञ्च- विभागानां सम्यकगाध्ययनेन यत् प्राप्तं भवति तदेव मनोविज्ञानं-जीवविज्ञानं -पदार्थविज्ञानं-रसविज्ञानं-भैषजविज्ञान इत्यादि

नामध्ययनेन भवति तत्र सर्वेषां विषयाणां समावेशः ज्योतिषशास्त्रे एव समादृतः ।

-----------------------------------------

1. वे.ज्यो. - ऋग्वेदज्योतिषम्, श्लोक-4

1.**सिद्धान्तः** --

त्रुटितः आरभ्य कल्पपर्यन्तं कालमानं, विविधमासानां निर्णयं, ग्रहाणांगत्यादिव्यक्ताव्यक्तगणितस्य, विविधग्रहनक्षत्रस्य अंशात्मिका-स्थित्यादीनां निरूपणं, देश-दिक्-कालज्ञानार्थं सिद्धान्तज्योतिषस्य उपयोगः भवति । विविधज्यादीनां निरूपणं अयन-मास-ऋतु-वर्षादीनां निर्णयोऽपि अस्येव विषयेषु अस्ति तेनकारणेन ज्योतिषशास्त्रस्य मुख्यम् अङ्गरूपेण सिद्धान्तज्योतिषमस्ति ।

**2.संहिता :---**

संहिताविभागस्य मुख्यविषयः सामूहिकरूपेण जायमानशुभाशुभस्य विश्लेषणमस्ति । शास्त्रेऽस्मिन् दिग्शोधनं, ग्रहोपकरणं, मेलापकं, भूमिशोधनं, जलाशयनिर्माणं, गृहारम्भः, ग्रहाचारः, उल्कापातः, वृष्टिः, जलप्रकोपं, भूकम्पेत्यादीनां विषयाणां रहस्यं वर्तते ।

**3.होरा :----**

प्रथमं तु होरा शब्दस्य कोऽर्थः ?

होराशब्दस्य मुख्यार्थः अहोरात्रेव अस्ति । अहोरात्रशब्दस्य आद्यान्तवर्णयोः लोपात् 'होरा' शब्दस्य निष्पत्तिं भवति। जन्मकालिकानां ग्रहाणामवस्थामनुसृत्य जातकस्य जीवने किं शुभाशुभं किं अशुभफलं भविष्यति तदेव निर्णयः शास्त्रमिदं क्रियते। तदेव होराशास्त्ररूपेण प्रसिद्धमस्ति।

**4.प्रश्नशास्त्रम् :---**

प्रश्नशास्त्रेण तात्कालिकगोचरफलं दृश्यते । प्रश्नशास्त्रस्य महत्त्वं अद्यतने अधिकमस्ति यतोहि यस्य कस्यापि जातकस्य यो प्रश्नः भवति तन्निवारणं अनेनशास्त्रेण भवति ।

**5.शकुनशास्त्रम् :---**

शकु शब्दस्यार्थः पक्षी भवति । अतएव पशु–पक्षीनां क्रिया–दर्शनं गमनागामादेव यत फलं भवति तदेवस्ति शकुनशास्त्रम् । यत् कोऽपि समये परितः दृश्यमानः मनुष्यः, वृक्षः, पशुः, पक्षी, पुष्पादि द्वारा यत् शुभाशुभानां विश्लेषणं भवति सैव शकुनशास्त्र रूपेण स्वीक्रियते ।

**(3)ज्योतिषशास्त्रस्य वैशिष्ट्समुपयोगिता च ।**

मानवजीवने यत् कोऽपि व्यवहाराणि सन्ति तेषां सम्यग्रूपेण प्रतिपादनार्थं ज्योतिषशास्त्रं अत्यंतमावश्यकमस्ति। षोडशसंस्काराणां सम्यग्रूपेण सम्पादनार्थं मुर्हूतादीनां आवश्यकता भवति। मुहूर्तबिना वा अमुर्हूतकृतकार्यं निष्फलं भवति।

वेदाः यज्ञप्रधाना भवन्ति। यज्ञस्य समुचितरूपेण यागादि कारणार्थं मुर्हूतस्य अतीव आवश्यकता भवति तेन कारणेन एव ज्योतिषशास्त्रविना यागादि पूर्णं न भवितुं शक्यते।

कृषिकरणार्थे वृष्ट्यागमनं ज्ञानं यथा अनावृष्टिः अतिवृष्टिः वृष्टिः एतेषां विषयाणां विना कृषिकर्मसाफल्यं न भवेत्। तेषां मध्ये सफलता प्राप्ति अर्थे ज्योतिषशास्त्र निर्मित मुर्हूतानां आवश्यकता अनिवार्यता च अस्ति।

समुद्राणां मध्ये जलयानं भारं निहित्वा प्रचलति तेषां दिशादि ज्ञानार्थं खगोले सूर्याचन्द्रादि दृष्ट्वा दिशादि परिज्ञानं भवति। तेनद्वारां सुनिश्चितस्थाने सुखेन गन्तुं शक्नोति।

अनुसन्धित्सूनां शोधकार्येऽपि इदं शास्त्रं सहायकमस्ति। ज्योतिष-शास्त्रे वर्णितरेखागणितं एवं पर्वतानां, नद्यादीनां उच्च-अधादि मापनं अपि अस्य शास्त्रस्य विषयाः सन्ति।

आयुर्वेदे औषधि चयनादि विविधरसानां निर्माणादि तथा च के-के मुर्हूते औषधिनां चयनं करणीयं तद् विषयेऽपि ज्योतिषशास्त्रस्यैव वैशिष्ट्यमस्ति।

ज्योतिषशास्त्र मानजीवने प्रत्यक्ष तथा परोक्षरूपेण सहयोगी। इत्थं प्रकारेण ज्योतिषशास्त्रस्य वैशिष्ट्यमस्ति ।

**द्वितीयोध्यायः योगपरिचयात्मकः**

(1) **योगशब्दस्य अर्थः** ---- मनुष्यजन्मस्य खगोलीयग्रहस्थित्याधारेण ग्रह-नक्षत्र-राशि-तिथिवारादीनां पञ्चाङ्गपूर्वकं जन्मपत्रिका क्रियते दैवज्ञः। तस्य जन्मप्रत्रिकायाः ग्रहयोगाधारेण प्रभावपूर्वकं फलनिर्देशनं क्रियते तत्र कोऽपि मनुष्यजीवने स्वकीये जीवनकाले कानि-कानि प्रकारणानि भागसाधनानि प्राप्यते कदा प्राप्यते केन उपायेन प्राप्यते तत् सर्वं ज्योतिषोक्तं योगभेदेन ज्ञातुं शक्यते। कोऽपि कार्यस्यसिद्धिः यथायोग्यं ग्रहयोगं विहाय नाऽपि सम्भवितुं शक्यते। योगशब्दः अतीव महत्वपूणम् असमाकं कृते। अतः योग शब्दस्य अर्थ स्पष्टीकरणं अतीव आवश्यकम् ।

> ‘‘यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणा पंक्तिम् ।
> व्यञ्जयति शास्त्रमेतन्नमसि द्रव्याणि दीप इव ।।’’[1]

**►योगशब्दस्य व्युत्पत्तिः** ----

संस्कृतभाषां युजिर् योगे धातोः घञ् प्रत्यय कृत्वा योग शब्दस्य व्युत्पत्तिः भवति।

►योगशब्दस्य सामान्येन अर्थः भवति मेलनम्, योगः सुयक्तम्। तस्य अन्य अर्थः संयुक्त संख्यकानि अपि भवति। यथा अग्रे कथितं ज्योतिष-

---

1. लघुजातकम् - 1/3

शास्त्रे योग इति ग्रहाणांविशिष्टस्थिति संयोगम् । विविध उपसर्गाधारेण योगस्य विविधार्थाः भवन्ति।

संस्कृतभाषायां विविध उपसर्गपूर्वकेन योगस्य विविध अर्थाः प्राप्यन्ते। यथा प्रयोग- उपयोग -संयोग-वियोग-अयोग-सहयोग-नियोग-सुयोग-दुर्योग इत्यादयः सन्ति ।

**►ज्योतिषशास्त्रानुसारेण योगः ---**

भिन्न-भिन्नकालेषु खगोले सूर्यादिग्रहाणां भिन्न-भिन्न नक्षत्रराशीसु विविधगतिपूर्वकं भ्रमणं भवेत् तेन कारणेन विविध फलं संभाव्यते। तत्रापि ग्रहाणां षडवर्गबलपूर्वकं अन्यग्रहाणां प्रति राशिभेदेन-कालभेदेन-दिक्भेदेयुत्यादिभेदेन च तात्कालिक संबंधपूर्वकेन या विशिष्टा परिस्थितिः उत्पद्यते सा ज्योतिषशास्त्रे संक्षेपेण **'योग'** शब्देन ज्ञायते।

अस्मिन् शास्त्रे योगः अनेकार्थेषु प्रयुक्तः यथा प्रतिदिनस्य योगः ग्रहप्रभावेण या काला' सः योगः यथा ---

**"ग्रहाणांस्थितिः भेदेन पूषान् योजयन्ति हि ।**
**फलैः कर्मसमुद्भूतैरिति योगाः प्रकीतिताः ।।"**[1]

## 1. विविधयोगानां स्वरूपाणि ।

| | | | |
|---|---|---|---|
| 1 | सूर्यादिग्रहजनितयोगाः | 4 | षोडशवर्गादिस्थानजनितयोगा |
| 2 | मेषादिराशिजनितयोगाः | 5 | राशिग्रहभावजनितयोगाः |

| | | | |
|---|---|---|---|
| 3 | द्वादशभावजनितयोागा: | 6 | नक्षत्रतिथिवारसंयोगजनितयोगा: |

---

1. प्र.मा. 9/48

**3.होराशास्त्रे वर्णितविभिन्नि योगा:**

1. राजयोगा:
2. नाभसयोगा:
3. अरिष्टभङ्गयोगा:
4. रोगकारकयोगा:
5. सन्यासयोगा:
6. दरिद्रयोगा:
7. मुर्हूतविषयिकयोगा:
8. पञ्चमहापुरुषयोगा:
9. वेशि–वाशि–उपचयारि योगा:
10. सुनफा–अनफा–दूर्धरायोगा:
11. केमद्रमुयोग–केमद्रुमभंग योगा:
12. ताजिकोक्त षोडशयोागा:
13. अमृतसिद्धियोगा:
14. विषकन्यायोगा:

**4.योगानां ग्रहयुतिदृष्टया अन्यदृष्टया च अध्ययनम् :---**

सूर्यादिग्रहाणां मित्रामित्र–उच्चनाथ–नीचनाथ–लग्नेश–भाग्येशादीनां अन्य शुभग्रहेणे सह युति–दृष्टि स्थानपरिवर्तनं षड्बलं षडवर्गेस्थिति– षोडशवर्गे पारावतांशादि इत्यादीनां विविधास्थितिवशात् यस्य शुभाशुभफलपूर्वकं योगा: जायन्ते तेषां अध्ययनं कृतं मया ।

**5.विशिष्टयोगानामध्ययनम् :---**

1. लग्ननादिग्रहस्थितिजनितयोगा: – महायोगा:
2. राशिसंख्याधारेणविशिष्टयोगा: – संख्यायोगा:
3. ग्रहगतविशिष्टिस्थितियोगा: –परिवर्तनयोग: –आकृतियोगा:
4. भावगतविशिष्टयोगा: – विपरीतराजयोग:
5. नीचभंगराजयोगा:

## (3) तृतीयोऽध्यायः (राजयोगपरिचयः)

**1.राजयोगस्य परिचयः परिभाषा स्वरूपञ्च ---**

ज्योतिशास्त्रे भिन्न-भिन्न संयोगे जनिताः योगाः पूर्ववर्णिताः सन्ति। तत्र जातकाय जीवने याः योगाः प्रवज्याप्रेरकाः सन्ति ते प्रवज्यायोगः कथ्यन्ते। यः योगः जातकाय दारिद्रयं ददाति तन्नाम दरिद्रयोगः। यः योगः रुग्णं करोति तन्नाम रोगकारकयोगः। तद्वत् यः योगः जातकाय राज्ञतुल्यं वैभव-ऐश्वर्य-धन-सौख्य-यश-पराक्रम-कीर्ति-सत्ता-समृद्धि-भूमिसुख-गजाश्वादि-वाहनसुखं इत्यादिकं वा प्रयच्छति तन्नाम् राजयोगः।

**►स्वरूप-लक्षणानि**

यस्य कस्यापि जातकस्य जन्मपत्रिकायां यथा विशिष्टग्रहराशि-भाव-भावानां-युति-दृष्टिसम्बन्धसंयोगेन ये विशिष्टयोगाः भवन्ति तथैव ते राजयोगाः बलिष्ठ केन्द्र-त्रिकोणयोगकारकैः ग्रहसंयोगैः च उद्भवन्ति।

**2.राजयोगनां भेदाः तत्फलञ्च :--**

1. पूर्वोक्ताः महायोगाः पञ्चमहापुरुषयोगाः नाभसयोगाश्चः।
2. विपरीतराजयोगाः -उत्तरकालामृते कविकालिदासेन कथिता हर्ष-सरल-विमलयोगाश्च कथिता ।
3. नीचभङ्गराजयोगाः -फलदीपिकायां आचार्यमन्त्रेश्वरकथिताः नीचभङ्ग -राजयोगाः ।

**3.जातकानां द्वादशलग्नेषु राजयोगानां प्रभावाः तत्फलञ्च :--**

जातकानां जन्मपत्रिकासु मेषादिद्वादशलग्नेषु योगकारकग्रहैः राजयोगाः कथं उद्भवन्ति तथा च तेषां कथं प्रभावाः प्रभवन्ति तथा च तत् फलं जातकस्य जीवने कथं प्रभवति इत्यादिकं सर्वम् अत्र वर्णितं मया।

**4.प्रमुखाचार्याणां मते प्रमुखराजयोगाः ---**

ज्योतिषशास्त्रे वराहमिहिर, पाराशर, मन्त्रेश्वर, कालिदास, कल्याणवर्मा, जैमिनी, रामानुजाचार्य एते आचार्याः प्रमुखाः सन्ति। तेषां मतेऽपि यत्र तत्रापि साम्यं यत्रतत्रापि वैषम्यं वर्तते। तेषां मतानां उदाहरणपूर्वकं मया शोधप्रबन्धे निर्दिष्टमिति ।

## (4) चतुर्थोऽध्यायः (समीक्षात्मकः)

**राजयोगानां विविधोदाहरणानि :---**

अयं अध्यायः समीक्षात्मकः वर्तते। ज्योतिषशास्त्रे अनेकैः आचार्यैः स्वग्रन्थेषु राजयोगानां गणनाकृता। किन्तु नामसु भेदाः प्राप्यन्ते, फलेषु भेदाः अपि प्राप्यन्ते। एतेषां सर्वेषां राजयोगानां मया शोधप्रवन्धे उदाहरणानि प्रतिपादितानि।

**2.ज्योतिषशास्त्रोक्त राजयोगानां समीक्षणम् :--**

राजयोगानां प्रमुखभेदाः त्रयः एव सन्ति ।

1.महायोगाः 2.विपरीतराजयोगाः 3.नीचभङ्गराजयोगाः।

ज्योतिषशास्त्रस्य प्रमुखाचार्यैः स्वकीयग्रन्थे तेषां वर्णनं विस्तरेण कृतमस्ति।

1.बृहद्पाराशरहोराशास्त्रे श्रीपराशरेण केन्द्र-त्रिकोणग्रहजनित उच्चस्थ -ग्रहजनितः तथा च जन्मलग्न-होरालग्न-घटीलग्न एवं कारकांश-लग्नाधरेण घटिताः राजयोगाः कथिता।

ग्रन्थेऽसिमन्विशेषधनयोगाः-दरिद्रयोगाश्च पृथक-पृथक अध्यायेषु वर्णिताः सन्ति । अन्यग्रन्थानां तुलनया ग्रन्थेऽस्मिन् अतिसूक्ष्म -गणनयाः राजयोगानां विवेचनं कृतमस्ति ।

तेषां सर्वेषां समीक्षा अध्यायेऽस्मिन् अहं कृतवती ।महर्षि पराशरस्य ग्रन्थोऽयं ज्योतिषग्रन्थानाम् उपजीव्यरूपेण वर्तते।

2.त्रिस्कन्धवेत्ता श्रीवराहमिहिराचार्येण स्वकीयबृहज्जातकग्रन्थे उच्चमूल-त्रिकोण वर्गोत्तमनवांशाधारेण समुद्भूत-योगानां वर्णनं कृतममस्ति ।

ग्रन्थेऽस्मिन् सूर्यचन्द्रजनितराजयोगानां वर्णनमपि अस्ति। तत् सर्वेषां विस्तरेण समीक्षणं अहं अध्यायेऽस्मिन् कृतवती ।

3.श्रीमंत्रेश्वररचित फलदीपिकायां नीचस्थग्रहाः अपि कथ राजयोगाः क्रियन्ते तत् फलं विशिष्टरूपेण वर्णितमस्ति। यदि नीचस्थग्रहस्य उच्चनाथः लग्नात् चन्द्रात् वा केन्द्रे विद्यते चेत् तर्हि नीचभङ्गराजयोगः उद्भवति। तेषां सर्वेषां समीक्षा मया अत्र कृतमस्ति। तत्र परिवर्तनयोगानां अपि विवेचनमस्ति ।

4.उत्तरकालामृते कविकालिदासेन त्रिकेशजनितानां विपरीतराजयोगानां हर्ष-विमल-खलयोागनां च वर्णनं कृतमस्ति ।उत्तरकालामृते चतुर्थे खण्डे अन्येऽपि विविधराजयोगानां वर्णनं प्राप्नोति। एतेन अरिष्ट- स्थानेन अपि राजयोगाः कथं भवन्ति तत् समीक्षाऽपि मया तत्र कृतास्ति। सर्वेषां आचार्याणां राजयोगविषये मतं एकम् नास्ति।

एतेषां सर्वेषां ग्रनथेभ्यः उदाहरणानि गृहीत्वा मया तेषां समीक्षणं कृतमस्ति । अध्यायेऽस्मिन् राजयोगविषयकम् ।

**3.राजयोगानां विश्लेषाणत्मकमध्ययनम् :--**

चतुर्थाध्याये कतिचन विख्यातराजयोगयुक्ताजन्मुकुण्डलीनां विश्लेषणं कृतम् ।

तत्र काचन प्राचीनराजयोगकारीकुण्डल्यः उदाहृत्य तद्विश्लेषणं कृतमस्ति। काचन वर्तमानकालिकानां राजपुरुषाणां कतिपयानां कुण्डल्यः प्रसिद्धजनानां कुण्डल्यः विभिन्नक्षत्रेषु अग्रगण्यजनानां कुण्डलीं च उदाहृत्य कुण्डल्यः तासु उद्भूत राजयोगानां सूक्ष्मविश्लेषणं अस्मिन् प्रकरणे अहं कृतवती ।

**4.राजयोगानां विषये विविधमतानां विश्लेषणम्**

चतुर्थाऽध्याये विविधाचार्याणां मतानां विश्लेषणपूर्वकं समापनं कृतमस्ति ।

पर्यन्ते च मयोपसंहारः संश्लिष्टः। ततः परः आधारग्रन्थानां नामानि च लिखितानि । अत्रोपस्थापितामयाहम् शीर्षकानुक्रमणिकेति ।

## "ज्योतिषशास्त्रोक्तराजयोगानां विश्लेषणात्मकमध्ययनम्"

## अनुक्रमणिका

**भूमिका**

### 1. प्रथमोऽध्यायः (ज्योतिषशास्त्रपरिचयात्मकः)

1. षड्वेदाङ्गेषु ज्योतिषं तन्महत्त्वञ्च ।
2. ज्योतिषशास्त्रस्य परिचयः तद् वैशिष्ट्यमुपयोगिता महत्त्वञ्च ।
3. ज्योतिषशास्त्रस्य मूलभूततत्त्वानि ।
4. ज्योतिषशास्त्रे विविधयोगाः तेषामुपयोगिता च ।

### 2. द्वितीयोऽध्यायः (योगपरिचयात्मकः)

1. योगशब्दस्य अर्थः पर्यायः भेदाश्च ।
2. विविधयोगानां स्वरूपाणि ।
3. होराशास्त्रोक्तयोगाः तन्नामानि च ।

4.योगानां ग्रहयुतिदृष्ट्या अन्यदृष्ट्या च अध्ययनम् ।

5.विशिष्टयोगानामध्ययनम् ।

## 3. तृतीयोऽध्यायः (राजयोगपरिचयात्मकः)

1. राजयोगस्य परिचयः परिभाषा स्वरूपञ्च ।
2. राजयोगानां भेदाः तत्फलञ्च ।
3. जातकानां द्वादशभावेषु राजयोगानां प्रभावः तत्फलञ्च ।
4. प्रमुखाचार्याणां मते प्रमुखराजयोगाः ।

## 4. चतुर्थोऽध्यायः (समीक्षात्मकः)

1. राजयोगानां विविधोदाहरणानि ।
2. ज्योतिषशास्त्रोक्तराजयोगानां समीक्षणम् ।
3. राजयोगानां विश्लेषणात्मकाध्ययनम् ।
4. राजयोगानां विषये विविधमतानां विश्लेषणम् ।

## 5. पञ्चमोऽध्यायः (उपसंहारः)

## 6. परिशिष्टम्

1. सन्दर्भग्रन्थनामानि ।